# संस्कृत भाषा परिचयः

# An Introduction to Sanskrit : Unit – XVI

**M. R. DWARAKANATH**

**॥ श्री भगवद्गीता – सांख्ययोगो नाम द्वितीयोऽध्यायः ॥**

अर्जुन उवाच ॥

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।**
**स्थितधीः किं प्रभाषेत किमासीत व्रजेत किम् ॥५४॥**

अर्जुनः उवाच ।

(हे)केशव । समाधिस्थस्य स्थितप्रज्ञस्य भाषा का । स्थितधीः प्रभाषेत किं आसीत किं व्रजेत किम् ॥

Oh Kesava [m,V,s] (केशव) what [f,N,s] (का) (is the nature of) speech [f,N,s] (भाषा) of one seated in deep meditation [m,G,s] (समाधिस्थस्य) of the resolute minded person [m,G,s] (स्थितप्रज्ञस्य) । One with a steady mind [m,N,s] (स्थितधीः) how [I] (किं) would he speak [pm,3p,s] (प्रभाषेत) how [I] (किं) would he sit [pm,3p,s] (आसीत) how [I] (किं) would he wander [pm,3p,s] (व्रजेत √व्रज्) ।

स्थिता प्रज्ञा यस्य सः (वा सा) स्थितप्रज्ञः (वा स्थितप्रज्ञा) । समाधौ स्थितः यः सः समाधिस्थः । स्थिता धीः यस्य सः स्थितधीः । – बहुव्रीहि समासाः ॥

प्रज्ञा च धीः are both feminine nouns. However the gender of the बहुव्रीहि compound depends on what it describes. In this case the compounds are to be regarded as masculine, as otherwise, we would have had स्थितप्रज्ञायाः, समाधिस्थायाः ।

श्रीभगवानुवाच ।

**प्रजहाति यदा कामान् सर्वान्पार्थ मनोगतान् ।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ॥५५॥**

श्रीभगवान् उवाच ।

(हे) पार्थ यदा सर्वान् मनोगतान् कामन् प्रजहाति आत्मनि एव आत्मना तुष्टः (भवति) तदा स्थितप्रज्ञः (इति) उच्यते ॥

Oh Arjuna [m,V,s] (पार्थ) when[I] (यदा) one abandons [prt,3p,s] (प्रजहाति √हा) all [m,A,p] (सर्वान्) desires [m,A,p] (कामान्) entering the mind [m,A,p] (मनोगतान्) satisfied [m,N,s](तुष्टः) in the self [m,L,s] (आत्मनि) by the self [m,I,s] (आत्मना) only [I] (एव) then [I](तदा) he is called [prt,3p,s,pass] (उच्यते √वच्) a resolute minded person [m,N,s] (स्थितप्रज्ञः) ।

मनोगत – मनसि गत is a तत्पुरुष compound. Note the प्रातिपदिकम् of मनसि is मनस् । Thus the compound is मनोगत and not मनगत ।

**दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः ।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ॥५६॥**

(यः) दुःखेषु अनुद्विग्नमनाः सुखेषु विगतस्पृहः
वीतरागभयक्रोधः (सः) स्थितधीः मुनिः उच्यते ॥

(He who is) mentally unperturbed [m,N,s] (अनुद्विग्नमनाः) in misery [n,L,pl] (दुःखेषु) with lost attachment [m,N,s] (विगतस्पृहः) in pleasures [n,L,pl] (सुखेषु) lost attachment, fear and anger [m,N,s] (वीतरागभयक्रोधः) (he) is called [prt,3p,s] (उच्यते √वच्) a firm minded [m,N,s] (स्थितधीः) sage [m,N,s] (मुनिः) ।

अनुद्विग्नमनाः च विगतस्पृहः च वीतरागभयक्रोधः च स्थितधीः are all बहुव्रीहि compounds meaning a person with those attributes. They are all masculine gender in this context.

अनुद्विग्नमनस् is declined like वेधस् not मनस् because the latter is neuter while the former is masculine gender!

**यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम् ।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥५७॥**

यः सर्वत्र अनभिस्नेहः तत् तत् शुभाशुभं प्राप्य न अभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ॥

He who [m,N,s] (यः) without attachment [m,N,s] (अनभिस्नेहः) everywhere [I] (सर्वत्र) neither [I] (न) enjoys [prt,3p,s] (अभिनन्दति √नन्द्) nor [I] (न) hates [prt,3p,s] (द्वेष्टि √द्विष्) respectively [n,A,s] (तत् तत्) the good and the bad [n,A,s] (शुभाशुभं) having happened [ger] (प्राप्य) । His [m,G,s] (तस्य) knowledge [f,N,s] (प्रज्ञा) is resolute [f,N,s] (प्रतिष्ठिता √स्था) ।

शुभञ्च अशुभञ्च शुभाशुभे (इतरेतर द्वन्द्व) । शुभञ्च अशुभञ्च एतयोः समाहारः शुभाशुभम् (समाहार द्वन्द्व) । समाहार द्वन्द्व includes not only the objects mentioned but others of that ilk!

**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।**
**इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ॥५८॥**

च यदा अयं इन्द्रियाणि इन्द्रियार्थेभ्यः सर्वशः संहरते कूर्मः अङ्गानि इव । तस्य प्रज्ञा प्रतिष्ठिता ।

And [I] (च) when [I] (यदा) this person [m,N,s] (अयं) completely [I] (सर्वशः) withdraws [prt,3p,s] (संहरते □हृ) the senses [n,A,pl] (इन्द्रियाणि) from the sense objects [m,Ab,pl] (इन्द्रियार्थेभ्यः) like [I] (इव) a turtle [m,N,s](कूर्मः) (withdraws संहरते ) its limbs [n,A,pl] (अङ्गानि) । His [m,G,s] (तस्य) knowledge [f,N,s] (प्रज्ञा) is resolute [f,N,s] (प्रतिष्ठिता □स्था) ।

यथा कूर्मः अङ्गानि संहरते तथा अयं इन्द्रियाणि संहरते । Notice the समाधिकरणं (कूर्मः – अयं, अङ्गानि – इन्द्रियाणि) in a simile. The objects of comparison on the two sides have to agree in case.

**विषया विनिवर्तन्ते निराहारस्य देहिनः ।**
**रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ॥५९॥**

विषयाः रसवर्जं निराहारस्य देहिनः विनिवर्तन्ते । रसः अपि परं दृष्ट्वा निवर्तते ॥

Sense objects [m,N,pl] (विषयाः) sans taste [I] (रसवर्जं) turn away [prt,3p,pl] (विनिवर्तन्ते □वृत्) from fasting [m,G,s] (निराहारस्य) persons [m,G,s] (देहिनः) । Even [I] (अपि) taste [m,N,s] (रसः) turns away [prt,3p,s] (विनिवर्तते □वृत्) from him [m,G,s] (अस्य) having seen [ger] (दृष्ट्वा) the supreme [n,A,s] (परम्) ॥

**यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।**
**इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥६०॥**

कौन्तेय । हि प्रमाथीनि इन्द्रियाणि यततः विपश्चितः पुरुषस्य अपि मनः प्रसभं हरन्ति ॥

Oh son of Kunti [m,V,s] (कौन्तेय) । Because [I] (हि) the agitatin g[n,N,pl] (प्रमाथीनि) senses [n,N,pl] (इन्द्रियाणि) forcibly [I] (प्रसभं) steal [prt,3p,pl] (हरन्ति □हृ) the mind [n,A,s] (मनः) even [I] (अपि) of a striving [prp,m,G,s] (यततः) learned [m,G,s] (विपश्चितः) person [m,G,s] (पुरुषस्य) ।

**तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।**
**वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥६१॥**

तानि सर्वाणि संयम्य मत्परः युक्तः आसीत हि यस्य वशे इन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ॥

Having restrained [ger] (संयम्य) them [n,A,pl] (तानि) all [n,A,pl] (सर्वाणि) he should sit [pm,3p,s] (आसीत □आस्) engaged [m,N,s] (युक्तः) in me as supreme [m,N,s] (मत्परः) whose [m,G,s] (यस्य) senses [n,N,pl] (इन्द्रियाणि) are in control [m,L,s] (वशे) his [m,G,s] (तस्य) knowledge [f,N,s] (प्रज्ञा) is resolute [f,N,s] (प्रतिष्ठिता □स्था) ।

**ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।**
**सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ॥६२॥**

पुंसः विषयान् ध्यायतः तेषु सङ्गः उपजायते । सङ्गात् कामः सञ्जायते । कामात् क्रोधः अभिजायते ॥

Man's [m,G,s] (पुंसः) contemplating [prp,m,G,s] (ध्यायतः) on sense objects [m,A,pl] (विषयान्) begets [prt,3p,s] (उपजायते □जन्) attachment [m,N,s] (सङ्गः) in them [m,L,pl] (तेषु) । From attachment [m,Ab,s] (सङ्गात्) desire [m,N,s] (कामः) is born [prt,3p,s] (सञ्जायते □जन्) । From desire [m,Ab,s] (कामात्) anger [m,N,s] (क्रोधः) is produced [prt,3p,s] (अभिजायते □जन्) ॥

उपजायते, सञ्जायते, अभिजायते : This is an instance where the उपसर्गाः do not change the meaning significantly from the root जायते ।

**क्रोधाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः।**
**स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति ॥६३॥**

क्रोधात् संमोहः भवति । संमोहात् स्मृतिविभ्रमः (भवति) । स्मृतिभ्रंशात् बुद्धिनाशः (भवति) । बुद्धिनाशात् प्रणश्यति ॥

From anger [m,Ab,s] (क्रोधात्) arises [prt,3p,s] (भवति □भू) delusion [m,N,s] (संमोहः) । From delusion [m,Ab,s] (संमोहात्) cessation of

intellect [m,N,s] (बुद्धिनाशः) । From lapse of intellect [m,Ab,s] (बुद्धिनाशात्) he perishes [prt,3p,s] (प्रणश्यति √नश्) ॥

## २ वृत्तयः – Expositions / Glosses

### ३-३ तद्धितवृत्ति – Nominal derivatives

We will continue the study of तद्धित derivatives. तद्धिताः are affixes added to nominals to generate other nominals, i.e. Nouns or Adjectives. Adverbs are also formed by the तद्धित process as we shall see in the next unit.

### ३-३-२ भावार्थवाचकाः - State Indicators

This affix changes a given noun to its state of being or to an abstraction of the noun. In English, this is equivalent to adding the suffix -ness, -hood etc. The more common affixes are:

त, त्व, न, स्न, इमन्, य, इत्यादयः ।

Grammatically, these affixes are actually called:

तल्, त्व, नञ्, स्नञ्, इमनिच्, ष्यञ्, इत्यादयः ।

The additional sounds often serve to indicate the gender of the new noun and other modifications the noun may undergo - such as वृद्धि of the initial vowel! In particular, ञ् indicates वृद्धि । Note the affix is not added directly to the noun - there is some elision also!

Let us consider one example in some detail - महत् । महतो भावः

महत् + त = महत्त (स्त्री) महत्ता (प्रथमा,एक)।

महत् + त्व = महत्व (नपुं) महत्वम् (प्रथमा,एक)।

महत् + इमन् = महिमन् (पुं) महिमा (प्रथमा,एक)।

Additional examples without details:

गोर्भावः गोत्वं वा गोता । गुरोर्भावः गुरुत्वं गौरवं वा गुरुता । स्त्रिया भावः स्त्रीत्वं वा स्त्रीता वा स्त्रैणम् । शीतस्य भवः शैत्यं वा शीतिमा । जडस्य भावः जाड्यं जडत्वं जडता वा जडिमा । Other familiar derivative nouns:

अणिमा, गरिमा, लघिमा इत्यादयः ।

### ३-३-३ मत्वर्थीयाः वा तस्येदं Possessives

This derivative noun indicates the possessor of the property. तस्य इदम् । This is not to be confused with the Genitive case. Notice the difference:

रामस्य हृदयम् । हृदयस्य स्थानम् । रामः हृदयालुः ।

The 1st two sentences talks about Rama's heart and heart's place while the third talks about Rama possessed of a heart (kindness.)

Here, the more common affixes are:

मत्, वत्, इन्, विन्, मिन्, आलु, इक, इत, इन् इत्यादयः । श्रियः यस्य सन्ति श्रीमत् (श्रीमान्) । विद्यावत् (विद्यावान्) । गुणिन् (गुणी) । तपस्विन् (तपस्वी) । वाग्मिन् (वाग्मी) । कृपालु (कृपालुः) । सेना – सैनिक । कुसुम – कुसुमित । केश – केशव । पण्डा – पण्डित ॥

## ४ तिङन्तप्रकरणम् - Verbs / Conjugation

### ४-४ लेट् Subjunctive mood

This mood is prevalent mainly in Vedic Sanskrit. It is used to express 'will' or 'shall' in contrast to the potential 'would' or 'should.' The terminations are given for reference. The mood marker is अ ।

परस्मैपद लेट् तिङन्ताः

| | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथम पुरुष | अति, अत् | अतः | अन् |
| मध्यम पुरुष | असि, अः | अथः | अथ |
| उत्तम पुरुष | आनि | आव | आम |

आत्मनेपद लेट् तिङन्ताः

| | एक वचन | द्वि वचन | बहु वचन |
|---|---|---|---|
| प्रथम पुरुष | अते, आतै | ऐते | अन्ते, अन्त |
| मध्यम पुरुष | असे, आसै | ऐथे | अध्वे, आध्वै |
| उत्तम पुरुष | ऐ | अवहै, आवहे | आमहै, आमहे |

**Usage:** पश्येम शरदश्शतं जीवेम शरदश्शतं नन्दाम शरदश्शतं मोदाम शरदश्शतं भवाम शरदश्शतं शृणवाम शरदश्शतं प्रब्रवाम शरदश्शतं अजीतास्याम शरदश्शतं ज्योक् च सूर्यं दृषे ।

The finite verbs are either potential (पश्येम, जीवेम, अजीतास्याम) or subjunctive. Imperative and subjunctive have the same form in 1st person परस्मै । Another less ambiguous example:

न ता नशन्ति न दभाति तस्करः । दभाति □दभ् दम्भ् to hurt or to cheat.

**Sanskrit Crossword #15**

(One syllable per box)

**Clues Across:**

१ मङ्गलग्रह
४ एनस्, पापम्
५ एकोन शतम्
६ श्रीरमस्य श्वशुरः
८ गृहं वा आयतनम्
१० यः ददाति सः
११ पच् – लिटि प्रथम पुरुष एक वचन
१२ लघोर्भावः
१३ नृत् क्ष गुण क्ष अन (नपुं भावे)

**Clues Down:**

२ सीतापहरणदेशः
३ वैनतेयस्य माता
४ वेलां अतिक्रान्तः
६ जननकाले ग्रहस्थानसूचकलेखः
७ एकदा वा अन्यदा
८ गणनम् वा आग्रह
९ यज्ञकर्ता

**Exercises**

1. Do विग्रह ।

सौमित्रिः । काकुत्स्थः । कार्तिकेयः । वैयासिकः । निपुणता । तारुण्यम् । गरुत्मत् । नाविकः । कृषीवलः । हस्तिन् ॥

| | | | | | | |
|---|---|---|---|---|---|---|
| १ | ३ | | ३ | | ३ | |
| | ३ | | | | | |
| | | | | | | |
| ३ | | ३ | | ३ | | ३ |
| | | १३ | | | | |
| ११ | | | | १३ | | |
| | | १३ | | | | |

**1.** Solution to crossword # 14

१ क्षिप्र । ४ गज । ५ सम्प्रसारण । ६ प्रणव । ८ पतित । १० राधेय । ११ पवन । १२ स्वभाव । १३ नकुल ॥ २ प्रसरण । ३ प्रासाद । ४ गणपति । ६ प्रजापति । ७ वरानन । ८ पयस्वल । ९ तपोवन ॥

## Golden words of Jagadguru Sri Chandrasekhara Bharati Mahaswamigal

### Futility of Possession

- Happiness is a state of mind and does not depend on the quality or quantity of external possessions. A person may be the lord of all three worlds and yet be unhappy. Another may be the poorest of beggars and yet be the happiest man in the world.